श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# શ્રીમદ્ ભાગવત રસિક કુટુંબ

# નારાયણ કવચ



**કવચ કર્યું જેણે આ ધારણ નારાયણ એના ભવ તારણ**

**પ્રાર્થના**

**નારાયણં(ન્) નમસ્કૃત્ય, નરં(ઞ્) ચૈવ નરોત્તમમ્.**
**દેવીં(મ્) સરસ્વતીં(મ્) વ્યાસં(ન્), તતો જયમુદીરયેત્.**

**નામસઙ્કીર્તનં(મ્) યસ્ય, સર્વપાપપ્રણાશનમ્.**
**પ્રણામો દુ:ખશમનસ્, તં(ન્) નમામિ હરિં(મ્) પરમ્.**

**અથ શ્રીમદ્ ભાગવતમહાપુરાણમ્**
**ષષ્ઠઃ સ્કન્ધઃ અથાષ્ટમોઽધ્યાયઃ (નારાયણ કવચનો ઉપદેશ)**

**રાજોવાચ**

**યયા ગુપ્તઃ (સ્) સહસ્રાક્ષઃ(સ્), સવાહાન્ રિપુસૈનિકાન્ .**
**ક્રીડન્નિવ વિનિર્જિત્ય, ત્રિલોક્યા બુભુજે શ્રિયમ્ .. ૧..**

સહસ્ + રાક્ષઃ, ક્રીડન્ + નિવ

**ભગવં(વ્)સ્તન્મમાખ્યાહિ, વર્મ નારાયણાત્મકમ્ .**
**યથાઽઽતતાયિનઃ(શ્) શત્રૂન્, યેન ગુપ્તોઽજયન્મૃધે .. ૨..**

ભગવંસ્ + તન્ + મમાખ્યાહિ ,
ગુપ્તોઽ + જયન્ + મૃધે

**શ્રીશુક ઉવાચ**

**વૃતઃ(ફ્) પુરોહિતસ્ત્વાષ્ટ્રો, મહેન્દ્રાયાનુપૃચ્છતે.**

**નારાયણાખ્યં(મ્) વર્માહ, તદિહૈકમનાઃ(શ્) શૃણુ .. ૩..**

પુરો + હિતસ્ + ત્વાષ્ટ્રો, તદિહૈ + કમનાઃ

**વિશ્વરૂપ ઉવાચ**

**ધૌતાઙ્ઘ્રિપાણિરાચમ્ય, સપવિત્ર ઉદઙ્મુખઃ .**

**કૃતસ્વાઙ્ગકરન્યાસો, મન્ત્રાભ્યાં(મ્) વાગ્યતઃ(શ્) શુચિઃ .. ૪..**

ધૌતાઙ્ઘ્રિ + પાણિ + રાચમ્ય

કૃતસ્વાઙ્ + ગકરન્ + યાસો

**નારાયણમયં(મ્) વર્મ, સન્નહ્યેદ્ ભય આગતે .**

**પાદયોર્જાનુનોરૂર્વો- રુદરે હૃદ્યથોરસિ .. ૫..**

પાદયોર્ + જાનુનોરૂર્વો , હૃદ્ય + થોરસિ

**મુખે શિરસ્યાનુપૂર્વ્યા- દોઙ્કારાદીનિ વિન્યસેત્ .**

**ૐ નમો નારાયણાયેતિ, વિપર્યયમથાપિ વા .. ૬..**

શિરસ્યા + નુપૂર્ + વ્યા, વિપર્ + યય + મથાપિ

**કરન્યાસં(ન્) તતઃ(ખ્) કુર્યાદ્, દ્વાદશાક્ષરવિદ્યયા .**

**પ્રણવાદિયકારાન્ત, મઙ્ગુલ્યઙ્ગુષ્ઠપર્વસુ .. ૭..**

દ્વાદશા + ક્ષર + વિદ્યયા,

મઙ્ગુલ્યઙ્ + ગુષ્ઠ + પર્વસુ

**ન્યસેદ્ધૃદય ઓઙ્કારં(મ્), વિકારમનુ મૂર્ધનિ .**

**ષકારં(ન્) તુ ભ્રુવોર્મધ્યે, ણકારં(મ્) શિખયા દિશેત્ .. ૮..**

ન્યસેદ્ + ધૃદય, ભ્રુવોર્ + મધ્યે

**વેકારં(ન્) નેત્રયોર્યુઞ્જ્યાન્- નકારં(મ્) સર્વસન્ધિષુ .**

**મકારમસ્ત્રમુદ્દિશ્ય, મન્ત્રમૂર્તિર્ભવેદ્ બુધઃ .. ૯..**

નેત્રયોર્ + યુઞ્જ્યાન્,

મકાર + મસ્ત્ર + મુદ્દિશ્ય

સવિસર્ગં(મ્) ફડન્તં(ન્) તત્, સર્વદિક્ષુ વિનિર્દિશેત્ .
ૐ વિષ્ણવે નમ ઇતિ .. ૧૦.

વિનિર્ + દિશેત્

આત્માનં(મ્) પરમં(ન્) ધ્યાયેદ્- ધ્યેયં(મ્) ષટ્ શક્તિભિર્યુતમ્ .
વિધાતેજસ્તપોમૂર્તિ- મિમં(મ્) મન્ત્રમુદાહરેત્ .. ૧૧..

ષટ્ + શક્તિ + ભિર્ + યુતમ્ ,

વિધા + તેજસ્ +તપો + મૂર્તિ

ૐ હરિર્વિદધ્યાન્મમ સર્વરક્ષાં(ન્),
ન્યસ્તાઙ્ઘ્રિપદ્મઃ(ફ્) પતગેન્દ્રપૃષ્ઠે .
દરારિચર્માસિગદેષુચાપ-
પાશાન્ દધાનોઽષ્ટગુણોઽષ્ટબાહુઃ .. ૧૨..

હરિર્ + વિદધ્યાન્ + મમ, ન્યસ્ + તાઙ્ઘ્ર + પદ્મઃ

દરારિ + ચર્મા + સિગદેષુ + ચાપ ,

દધા + નોઽષ્ટ + ગુણોઽષ્ટ + બાહુઃ

જલેષુ માં(મ્) રક્ષતુ મત્સ્યમૂર્તિર્-
યાદોગણેભ્યો વરુણસ્ય પાશાત્ .
સ્થલેષુ માયાવટુવામનોઽવ્યાત્,
ત્રિવિક્રમઃ(ખ્) ખેઽવતુ વિશ્વરૂપઃ .. ૧૩..

માયા + વટુ + વામનોઽવ્યાત્

દુર્ગેષ્વટવ્યાજિમુખાદિષુ પ્રભુઃ(ફ્),
પાયાન્નૃસિં(વ્) હોઽસુરયૂથપારિઃ .
વિમુઞ્ચતો યસ્ય મહાટ્ટહાસં(ન્),
દિશો વિનેદુર્ન્યપતં(વ્) શ્ચ ગર્ભાઃ .. ૧૪..

દુર્ગેષ્ + વટવ્યા + જિમુખા + દિષુ

પાયાન્ + નૃસિંહોઽ + સુરયૂથ + પારિઃ

વિનેદુર્ + ન્ય + પતંશ્ચ

રક્ષત્વસૌ માધ્વનિ યજ્ઞકલ્પઃ(સ્),
સ્વદં(વ્) ષ્ટ્રયોન્નીતધરો વરાહઃ .
રામોઽદ્રિકૂટેષ્વથ વિપ્રવાસે,
સલક્ષ્મણોઽવ્યાદ્ભરતાગ્રજોઽસ્માન્ .. ૧૫..

સ્વદંષ્ટ્ર + યોન્ + નીત + ધરો ,રામોઽદ્રિ + કૂટેષ્ + વથ, ભરતા + ગ્રજોઽ + સ્માન્

મામુગ્રધર્માદખિલાત્પ્રમાદાન્-
નારાયણઃ(ફ્) પાતુ નરશ્ચ હાસાત્ .
દત્તસ્ત્વયોગાદથ યોગનાથઃ(ફ્),
પાયાદ્ ગુણેશઃ(ખ્) કપિલઃ(ખ) કર્મબન્ધાત્ .. ૧૬..

મામુગ્ર + ધર્મા + દખિલાત્

દત્તસત્વ + યોગા + દથ

પાયાદ્ + ગુણેશઃ(ખ)

સનત્કુમારોઽવતુ કામદેવાદ્-
ધયશીર્ષા માં(મ્) પથિ દેવહેલનાત્ .
દેવર્ષિવર્યઃ(ફ્) પુરુષાર્ચનાન્તરાત્,
કૂર્મો હરિર્માં(ન્) નિરયાદશેષાત્ .. ૧૭..

સનત્ + કુમારોઽ + વતુ,

પુરુષાર્ + ચનાન્ + તરાત્

નિરયા + દશેષાત્

ધન્વન્તરિર્ભગવાન્ પાત્વપથ્યાદ્,
દ્વન્દ્વાદ્ ભયાદૃષભો નિર્જિતાત્મા .
યજ્ઞશ્ચ લોકાદવતાજ્જનાન્તાદ્,
બલો ગણાત્ ક્રોધવશાદહીન્દ્રઃ.. ૧૮..

ધન્વન્તરિર્ + ભગવાન્, ભયા + દૃષભો

લોકા + દવતાજ્ + જનાન્તાદ્

ક્રોધ + વશા + દહીન્દ્રઃ

દ્વૈપાયનો ભગવાન્પ્રબોધાદ્,
બુદ્ધસ્તુ પાખણ્ડગણાત્ પ્રમાદાત્ .
કલ્કિઃ(ખ્) કલેઃ(ખ્) કાલમલાત્ પ્રપાતુ,
ધર્માવનાયોરુકૃતાવતારઃ .. ૧૯..

ભગવાન્ + પ્રબોધાદ્ ,પાખણ્ડ + ગણાત્, ધર્મા + વનાયો + રુકૃતા + વતારઃ

માં(ઙ્ં) કેશવો ગદયા પ્રાતરવ્યાદ્,
ગોવિન્દ આસઙ્ગવમાત્તવેણુઃ .
નારાયણઃ(ફ્) પ્રાહ્ણ ઉદાત્તશક્તિર્-
મધ્યન્દિને વિષ્ણુરરીન્દ્રપાણિઃ .. ૨૦..

પ્રાત + રવ્યાદ્, આસઙ્ગવ + માત્ત + વેણુઃ, ઉદાત્ત + શક્તિર્, વિષ્ણુ + રરીન્દ્ર + પાણિઃ

દેવોઽપરાહ્ણે મધુહોગ્રધન્વા,
સાયં(ન્) ત્રિધામાવતુ માધવો મામ્ .
દોષે હૃષીકેશ ઉતાર્ધરાત્રે,
નિશીથ એકોઽવતુ પદ્મનાભઃ .. ૨૧..

મધુહો + ગ્રધન્વા , ત્રિધામા + વતુ

શ્રીવત્સધામાપરરાત્ર ઈશઃ(ફ્),
પ્રત્યૂષ ઈશોઽસિધરો જનાર્દનઃ .
દામોદરોઽવ્યાદનુસન્ધ્યં(મ્) પ્રભાતે,
વિશ્વેશ્વરો ભગવાન્ કાલમૂર્તિઃ .. ૨૨..

શ્રીવત્સ + ધામા + પરરાત્ર, દામોદરોઽ + વ્યા + દનુ + સંન્ધ્યં(મ્)

ચક્રં(મ્) યુગાન્તાનલતિગ્મનેમિ,
ભ્રમત્ સમન્તાદ્ ભગવત્પ્રયુક્તમ્ .
દન્દગ્ધિ દન્દગ્ધ્યરિસૈન્યમાશુ,
કક્ષં(મ્) યથા વાતસખો હુતાશઃ .. ૨૩..

યુગાન્તા + નલ + તિગ્ + મનેમિ, ભગવત્ + પ્રયુક્તમ્, દન્દગ્ + ધ્યરિ + સૈન્ય + માશુ

ગદેડશનિસ્પર્શનવિસ્ફુલિઙ્ગે,
નિષ્પિણ્ઢિ નિષ્પિણ્ઢ્યજિતપ્રિયાસિ .
કૂષ્માણ્ડવૈનાયકયક્ષરક્ષો-
ભૂતગ્રહાં(વ્)શ્ચૂર્ણય ચૂર્ણયારીન્ .. ૨૪..

ગદેડ + શનિસ્પર્શન + વિસ્ફુલિઙ્ગે
નિષ્ + પિણ્ઢ્ય + જિત + પ્રિયાસિ
કૂષ્માણ્ડ + વૈનાયક + યક્ષરક્ષો
ભૂત + ગ્રહાં(વ્)શ્ + ચૂર્ણય

ત્વં(મ્) યાતુધાનપ્રમથપ્રેતમાતૃ-
પિશાચવિપ્રગ્રહઘોરદૃષ્ટીન્ .
દરેન્દ્ર વિદ્રાવય કૃષ્ણપૂરિતો,
ભીમસ્વનોડરેર્હૃદયાનિ કમ્પયન્ .. ૨૫..

યાતુધાન + પ્રથમ + પ્રેતમાતૃ ,પિશાચ + વિપ્ર + ગ્રહ +ઘોરદૃષ્ટીન્
ભીમ + સ્વનોડરેર્ + હ્રદયાનિ

ત્વં(ન્) તિગ્મધારાસિવરારિસૈન્ય-
મીશપ્રયુક્તો મમ છિન્ધિ છિન્ધિ .
ચક્ષૂં(વ્)ષિ ચર્મઞ્છતચન્દ્ર છાદય.
દ્વિષામઘોનાં(મ્) હર પાપચક્ષુષામ્ .. ૨૬..

તિગ્મ + ધારા + સિવરારિ + સૈન્ય, મીશ + પ્રયુક્તો
ચર્મઞ્ + છત + ચન્દ્ર, દ્વિષા + મઘોનાં(મ્)

યન્નો ભયં(ઙ્) ગ્રહેભ્યોડભૂત્, કેતુભ્યો નૃભ્ય એવ ચ .
સરીસૃપેભ્યો દં(વ્)ષ્ટ્રિભ્યો, ભૂતેભ્યોં(વ્)ડહોભ્ય એવ વા .. ૨૭..

સરી + સૃપેભ્યો

સર્વાણ્યેતાનિ ભગવન્- નામરૂપાસ્ત્રકીર્તનાત્ .
પ્રયાન્તુ સ(ઙ્) ક્ષયં(મ્) સદ્યો, યે નઃ(શ્) શ્રેયઃ(ફ્) પ્રતીપકાઃ .. ૨૮..

નામ + રૂપાસ્ત્ર + કીર્તનાત્

ગરુડો ભગવાન્ સ્તોત્રસ્, તોભશ્છન્દોમયઃ(ફ્) પ્રભુઃ .
રક્ષત્વશેષકૃચ્છ્રેભ્યો, વિષ્વક્સેનઃ(સ્) સ્વનામભિઃ .. ૨૯..

તોભશ્ + છન્દોમયઃ

રક્ષત્વ + શેષ + કૃચ્છ્રેભ્યો

સર્વાપદ્ભ્યો હરેર્નામ- રૂપયાનાયુધાનિ નઃ .
બુદ્ધીન્દ્રિયમનઃ(ફ્) પ્રાણાન્, પાન્તુ પાર્ષદભૂષણાઃ .. ૩૦..

રૂપ + યાના + યુધાનિ, બુદ્ધીન્દ્રિય + મનઃ

યથા હિ ભગવાનેવ, વસ્તુતઃ(સ્) સદસચ્ચ યત્ .
સત્યેનાનેન નઃ(સ્) સર્વે, યાન્તુ નાશમુપદ્રવાઃ .. ૩૧..

નાશ + મુપદ્રવાઃ

યથૈકાત્મ્યાનુભાવાનાં(મ્), વિકલ્પરહિતઃ(સ્) સ્વયમ્ .
ભૂષણાયુધલિઙ્ગાખ્યા, ધત્તે શક્તીઃ(સ્) સ્વમાયયા .. ૩૨..

યથૈ + કાત્મ્યા + નુભાવાનાં(મ્), ભૂષણા + યુધ + લિઙ્ગાખ્યા

તેનૈવ સત્યમાનેન, સર્વજ્ઞો ભગવાન્ હરિઃ .
પાતુ સર્વૈઃ(સ્) સ્વરૂપૈર્નઃ(સ્), સદા સર્વત્ર સર્વગઃ .. ૩૩..

વિદિક્ષુ દિક્ષૂર્ધ્વમધઃ(સ્) સમન્તા-
દન્તબર્હિર્ભગવાન્ નારસિં(વ્) હઃ .
પ્રહાપયઁલ્લોકભયં(મ્) સ્વનેન,
સ્વતેજસા ગ્રસ્ત સમસ્તતેજાઃ .. ૩૪..

દિક્ષૂર્ + ર્ધ્વમધઃ(સ્) ,દન્તર્ + બહિર્ + ભગવાન્

પ્રહા + પયઁલ્લોક + ભયં(મ્), ગ્રસ્ત + સમસ્ત + તેજાઃ

મઘવન્નિદમાખ્યાતં(મ્), વર્મ નારાયણાત્મકમ્ .
વિજેષ્યસ્યઞ્જસા યેન, દં(વ્) શિતોઽસુરયૂથપાન્ .. ૩૫..

મઘવન્ + નિદ + માખ્યાતં(મ્), વિજેષ્ + યસ્યઞ્ + જસા

દં(વ્)શિતોઽ + સુર + યૂથપાન્

એતદ્ ધારયમાણસ્તુ, યં(મ્) યં(મ્) પશ્યતિ ચક્ષુષા .
પદા વા સં(વ્) સ્પૃશેત્ સદ્યઃ(સ્), સાધ્વસાત્ સ વિમુચ્યતે .. ૩૬..

ધારય + માણસ્તુ

ન કુતશ્ચિદ્ ભયં(ન્) તસ્ય, વિદ્યાં(ન્) ધારયતો ભવેત્ .
રાજદસ્યુગ્રહાદિભ્યો, વ્યાધ્યા દિભ્યશ્ચ કર્હિચિત્ .. ૩૭..

કુતશ્ + ચિદ્ ,રાજ + દસ્યુ + ગ્રહા + દિભ્યો ,
વ્યાધ્યા + દિભ્યશ્ચ

ઇમાં(મ્) વિદ્યાં(મ્) પુરા કશ્ચિત્, કૌશિકો ધારયન્ દ્વિજઃ .
યોગધારણયા સ્વાઙ્ગં(ગ્), જહૌ સ મરુધન્વનિ .. ૩૮..

યોગ + ધારણયા, મરુ + ધન્વનિ

તસ્યોપરિ વિમાનેન, ગન્ધર્વપતિરેકદા .
યયૌ ચિત્રરથઃ(સ્) સ્ત્રીભિર્- વૃતો યત્ર દ્વિજક્ષયઃ .. ૩૯..

ગન્ધર્વ + પતિ + રેકદા

ગગનાન્ન્યપતત્ સદ્યઃ(સ્), સવિમાનો હ્યવાક્શિરાઃ .
સ વાલખિલ્યવચના- દસ્થીન્યાદાય વિસ્મિતઃ .
પ્રાસ્ય પ્રાચીસરસ્વત્યાં(મ્), સ્નાત્વા ધામ સ્વમન્વગાત્ .. ૪૦..

ગગનાન્ + ન્ય + પતત્, હ્યવાક્ + શિરાઃ ,વાલ + ખિલ્ય + વચના દસ્થીન્ + યાદાય
પ્રાચી + સરસ્વત્યાં(મ્), સ્વમન્ + વગાત્

શ્રીશુક ઉવાચ

ય ઇદં(મ્) શૃણુયાત્ કાલે, યો ધારયતિ ચાદૃતઃ .
તં(ન્) નમસ્યન્તિ ભૂતાનિ, મુચ્યતે સર્વતો ભયાત્ .. ૪૧..

એતાં(મ્) વિદ્યામધિગતો, વિશ્વરૂપાચ્છતક્રતુઃ.
ત્રૈલોક્યલક્ષ્મીં(મ્) બુભુજે, વિનિર્જિત્ય મૃધેઽસુરાન્ .. ૪૨..

વિદ્યા + મધિગતો, વિશ્વ + રૂપાચ્ + છત + ક્રતુઃ
ત્રૈલોક્ય + લક્ષ્મીં(મ્), વિનિર્ + જિત્ય

**ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહં(વ્) સ્યાં(મ્) સં(વ્)હિતાયાં(મ્)**
**ષષ્ઠસ્કન્ધે નારાયણવર્મકથનં(ન્) નામાષ્ટમોઽધ્યાયઃ .. ૮..**

**ૐ પૂર્ણમદઃ(ફ્) પૂર્ણમિદં(મ્) પૂર્ણાત્પૂર્ણમુદચ્યતે**
**પૂર્ણસ્ય પૂર્ણમાદાય પૂર્ણમેવાવશિષ્યતે.**
**ૐ શાન્તિઃ(શ્) શાન્તિઃ(શ્) શાન્તિઃ**

